# Lesson 31: Bhagavad Gītā Pages 501 - 503

5. श्रीभगवान् उवाच । पार्थ, मे नानाविधानि दिव्यानि नाना-वर्ण-आकृतीनि च रूपाणि शतशः अथ सहस्रशः पश्य ।

6. आदित्यान् वसून् रुद्रान् अश्विनौ तथा मरुतः पश्य । भारत, बहूनि अदृष्ट-पूर्वाणि आश्चर्याणि पश्य ।

7. गुडाकेश, इह मम देहे एकस्थं कृत्स्नं स-चर-अचरं जगत्, यत् च अन्यद् द्रष्टुम् इच्छसि अद्य पश्य ।

8. अनेन तु एव स्व-चक्षुषा मां द्रष्टुं न शक्यसे । ते दिव्यं चक्षुः ददामि, मे ऐश्वरं योगं पश्य ।

9. संजयः उवाच । राजन्, ततः एवम् उक्त्वा, महा-योग-ईश्वरः हरिः पार्थाय परमम् ऐश्वरं रूपं दर्शयामास ।

10. अनेक-वक्त्र-नयनम् अनेक-अद्भुत-दर्शनम्, अनेक-दिव्य-आभरणं दिव्य-अनके-उद्यत-आयुधम् ।

11. दिव्य-माल्य-अम्बर-धरं दिव्य-गन्ध-अनुलेपनम्, सर्व-आश्चर्यमयं देवम् अनन्तं विश्वतः-मुखम् ।

12. यदि सूर्य-सहस्रस्य भाः दिवि युगपद् उत्थिता भवेत्, सा तस्य महात्मनः भासः सदृशी स्यात् ।

13. तत्र देव-देवस्य शरीरे पाण्डवः एकस्थं कृत्स्नं जगत् अनेकधा प्रविभक्तं तदा अपश्यत् ।

14. ततः सः विस्मय-आविष्टः हृष्टरोमा धनंजयः, शिरसा देवं प्रणम्य, कृत-अञ्जलिः अभाषत ।

15. अर्जुनः उवाच । देव, तव देहे सर्वान् देवान् तथा भूत-विशेष-संघान् कमल-आसनस्थं ब्रह्माणम् ईशं सर्वान् ऋषीन् च दिव्यान् उरगान् च पश्यामि ।

16. त्वाम् अनेक-बाहु-उदर-वक्त्र-नेत्रं सर्वतः अनन्तरूपं पश्यामि । न तव अन्तं न मध्यं न पुनः आदिं पश्यामि, विश्वेश्वर विश्वरूप ।

17. त्वां किरीटिनं गदिनं चक्रिणं च तेजः-राशिं सर्वतः दीप्तिमन्तं दुर्निरीक्ष्यं समन्ताद् दीप्त-अनल-अर्क-द्युतिम् अप्रमेयं पश्यामि ।

18. त्वम् अक्षरं परमं वेदितव्यं त्वम् अस्य विश्वस्य परं निधानम् । त्वम् अव्ययः शाश्वत-धर्म-गोप्ता त्वं सनातनः पुरुषः मे मतः ।

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

19. त्वाम् अन्-आदि-मध्य-अन्तम् अनन्त-वीर्यम् अनन्त-बाहुं शशि-सूर्य-नेत्रं दीप्त-हुताश-वक्त्रम् इदं विश्वं स्वतेजसा तपन्तम् पश्यामि ।

20. इदं हि द्यावा-पृथिव्योः अन्तरं त्वया एकेन व्याप्तम् सर्वाः दिशः च । तव इदं अद्भुतम् उग्रं रूपं दृष्ट्वा लोक-त्रयं प्रव्यथितं महात्मन् ।

21. अमी हि सुर-संघाः त्वां विशन्ति, केचिद् भीताः प्राञ्जलयः गृणन्ति । स्वस्ति इति उक्त्वा महा-ऋषि-सिद्ध-संघाः त्वां पुष्कलाभिः स्तुतिभिः स्तुवन्ति ।

22. रुद्र-आदित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः च गन्धर्व-यक्ष-असुर-सिद्ध-संघाः सर्वे विस्मिताः च एव त्वां वीक्षन्ते ।

23. महा-बाहो, ते महत् बहु-वक्त्र-नेत्रं बहु-बाहु-उरु-पादं बहु-उदरं बहु-दंष्ट्रा-करालं रूपं दृष्ट्वा लोकाः प्रव्यथिताः तथा अहम् ।

24. नभः-स्पृशं दीप्तम् अनेक-वर्णं व्यात्त-अननं दीप्त-विशाल-नेत्रं हि त्वां दृष्ट्वा प्रव्यथित-अन्तर्-आत्मा धृतिं च शमं च न विन्दामि, विष्णो ।

25. ते च दंष्ट्रा-करालानि काल-अनल-संनिभानि मुखानि दृष्ट्वा एव दिशः न जाने, शर्म च न लभे, देवेश जगत्-निवास प्रसीद ।

26. अमी च धृतराष्ट्रस्य सर्वे पुत्राः भीष्मः द्रोणः तथा असौ सूतपुत्रः अवनिपाल-संघैः सह एव अस्मदीयैः अपि योध-मुख्यैः सह त्वां…

27. … ते दंष्ट्रा-करालानि भयानकानि वक्त्राणि त्वरमाणाः विशन्ति । केचिद् दशन-अन्तरेषु विलग्नाः चूर्णितैः उत्तम-अंगैः संदृश्यन्ते ।

28. यथा नदीनां बहवः अम्बु-वेगाः समुद्रम् एव अभिमुखाः द्रवन्ति, तथा अमी नर-लोक-वीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति ।

29. यथा समृद्ध-वेगाः पतंगाः प्रदीप्तं ज्वलनं नाशाय विशन्ति, तथा एव समृद्ध-वेगाः लोकाः तव अपि वक्त्राणि नाशाय विशन्ति ।

30. समग्रान् लोकान् ज्वलद्भिः वदनैः ग्रसमानः समन्तात् लेलिह्यसे । समग्रं जगत् तेजोभिः आपूर्य तव उग्राः भासः प्रतपन्ति, विष्णो ।

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva